# श्री बद्रीनाथाष्टकम

भू – वैकुण्ठ – कृतं वासं देवदेवं जगत्पतिं |
चतुर्वर्ग – प्रदातारं  श्रीबदरीशं   नमाम्यहम  || १ ||

तापत्रय – हरं साक्षात् शान्ति – पुष्टि – बल – प्रदम |
परमानन्द – दातारं श्रीबदरीशं नमाम्यहम || २||

सध्य: पापक्षयकरं सध्य: कैवल्य – दायकं |
लोकत्रय – विधातारं श्रीबदरीशं नमाम्यहम ||३||

भक्त – वाञ्छा – कल्पतरूं  करुणारस -विग्रहं |
भवाब्धि – पार – कर्तारं श्रीबदरीशं नमाम्यहम ||४||

सर्वदेव – स्तुतं सश्वत सर्व – तीर्थास्पदं विभुं |
लीलयोपात्त – वपुषं श्रीबदरीशं नमाम्यहम ||५||

अनादिनिधनं कालकालं भीमयमच्युतम |
सर्वाश्चर्यमयं देवं श्रीबदरीशं नमाम्यहम ||६||

गंदमादन – कूटस्थं नर – नारायणात्मकं |
बदरी खण्ड – मध्यस्थं श्रीबदरीशं नमाम्यहम ||७||

शत्रूदासीन – मित्राणां सर्वज्ञं समदर्शिनम |
ब्रह्मानन्द – चिदाभासं श्रीबदरीशं नमाम्यहम ||८||

श्री बद्रिशाष्टकमिदं यः पठेत प्रयतः शुचिः |
सर्व – पाप – विनिर्मुक्तः स शांति लभते पराम् ||९||

|| ॐ तत्सत ||